
I
1534

T 234



२-३.

समवृत्तमाला, नौकाचरित्रं च

मैसूरुमहाराजास्थान धर्माधिकारि
पण्डितरत्नं रायपाल्य राघवेन्द्राचार्येण संशोधिता

वि. वेङ्कोबराव् बि. ए.,
(डेप्युटीकमीषनर्, बेंगळूरु)
महाशयेन प्राकाश्यनीयि।

मैसूरु
श्री जयालययन्त्रे मुद्रिता
१९२३.

(*All Rights Reserved*)

SRI CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
BANGALORE
Accn. No. 2739 2151

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

Class and No. I 234 70 R 56

1615-36 The Bangalore Press

23 JUL 1935
SREE CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
FORT, BANGALORE.
I 234
वाणी भवन वेलगी
Acc No. 2739
70

॥ श्रीः ॥

श्री वेङ्कटरायसूरिकृतयः २-३.

समवृत्तमाला, नौकाचरित्रं च

मैसूरुमहाजास्थान धर्माधिकारि
पण्डितरत्नं रायपाल्य राघवेन्द्राचर्येण संशोधिता

बि. वेङ्कोचराव् बि. ए.,
(डेप्युटीकमीषनर्, बेंगळूरु)
महाशयेन प्राकाश्यमनायि।

I-1934

मैसूरु
श्री जयालययन्त्रे मुद्रिता
१९२३.

(All Rights Reserved)

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

अवतरणिका ।

अधुना प्रकाश्यमानानां कृतीनां कवयितुः श्रीमतो वेङ्कटरायसूरेः वंशः, जीवितकालः, तदुदन्तश्चेत्यादिकं हरिवंशचम्पोरादिभागे यथावदुपावर्णि। ततोऽत्र तेषामेव वचनं पुनरुक्तं माभूदिति तत एव तत्सर्वं प्रतिपद्यतां विवित्सुभिरित्यत्र प्रकाश्यमानयोः समवृत्तमाला-नौकाचरित्रयोरितिवृत्तमात्रं किञ्चित्प्रस्तूयते ।

श्रीमद्भिः पिङ्गलादिभिराचार्यैः विस्तृत्य निरूपितस्य केदारान्तर्वाणिप्रमुखैः संगृहीतस्य च वैदिक-लौकिक-सम-विषमादिभेदभिन्नस्य छन्दसो विस्तरेण निरूपणं तैरेव कृतकरत्वात्, नातिप्रयोजनमिति मन्यमानः लौकिकानां उक्तादि छन्दोभवानां वृत्तानामुदाहरणमात्रमेकैकेन श्लोकेन सौव्वतत्कौशलप्रकाशनाय दिदर्शयिषुः समवृत्तमालानामकमिमं ग्रन्थं प्रणिनाय ।

नौकाचरित्रस्य तु इतिवृत्तं हरिवंशचम्पोरवतरणिकायां तदीयसाहित्यसम्मत्तिविवरणावसरे साधुनिरूपितमिति नात्रप्रतन्यते । अनयोः कृत्योः गुणज्ञाः महान्तः प्रकाशकमहाशयं श्रीमन्तं वेङ्कोबरायशर्माणमभिनन्दन्तुतरामित्याशास्ते ॥

सज्जनविधेयः,

मैसूरु
२२-१०-१९२३.

पण्डितरत्नं रा. राघवेन्द्राचार्यः,
महाराजास्थानधर्माधिकारी,
अनुभूतपूर्वराजकीयप्राच्यकोशागारप्रधानपण्डिताधिकारश्च ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

SREE CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
वाणीं भजत गैर्वाणीं
FORT, BANGALORE.

ॐ

॥ श्री श्रीनिवासाय नमः ॥

समवृत्तमालाप्रारम्भः

१—उक्ताछन्दसि,

(१) श्रीवृत्तम्— श्रीशः । स्वं नः ॥ १ ॥

२—अत्युक्ताछन्दसि,

(२) स्त्रीवृत्तम्— लक्ष्मीजानेः । नान्यं जाने ॥ २ ॥

३—मध्याछन्दसि,

(१) नारीवृत्तम्— पूर्णत्वादीश त्वाम् । कः स्तोतुं दक्षःस्यात् ॥ ३ ॥

(२) मृगीवृत्तम्— सर्वतो भावना । श्रीपतेरस्तु ते ॥ ४ ॥

४—प्रतिष्ठाछन्दसि,

(१) कन्यावृत्तम्— श्रीशस्याङ्घ्रौ वासः श्रेयान् ।
तस्माच्चेत स्तुच्छं मा गाः ॥ ५ ॥

५—सुप्रतिष्ठाछन्दसि,

(१) पङ्क्तिवृत्तम्— मामकचेतः खिद्यति नाल्पे ।
खेलति नित्यं श्रीशपदाब्जे ॥ ६ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

६—गायत्रीछन्दसि,

(१) **सोमराणी**— असद्वार्तयाऽलं वद श्रीविलोलम् ।
सदैवार्तपालं मुदा मुक्तिमूलम् ॥ ७ ॥

(२) **तनुमध्या**— चेतस्स्मर पूतं धातृस्मरतातम् ।
नन्दप्रियपोतं तं सद्गुणजातम् ॥ ८ ॥

(३) **कामतिलका**— श्रीश जयतस्ते हंसवरयुक्ते ।
मामकहृदब्जे चारुचरणाब्जे ॥ ९ ॥

(४) **शशिवदना**— स्मरहरसेव्यं मुरहरसंज्ञम् ।
किमपि महो नः कलयति मोदम् ॥ १० ॥

(५) **स्रग्विणी**— त्वत्पदे भ्राजते मन्मनो भृङ्गवत् ।
त्वं च नो मानसे श्रीनिधे हंसवत् ॥ ११ ॥

(६) **सोमकुलम्**— दत्ताजादिपदं ध्यातं श्रीशपदम् ।
दद्यान्नः स्वपदं सर्वाभीष्टपदम् ॥ १२ ॥

(७) **वसुमती**— कृष्णं नतिमतां कल्पक्षितिरुहम् ।
दत्ताभयमहं ध्याये नरहरिम् ॥ १३ ॥

७—उष्णिक्छन्दसि,

(१) **मदलेखा**— लक्ष्मीनाथ कृपाळो याचे त्वाऽद्य नतस्ते ।
भक्त्या दास्यमजस्रं दत्वा मामव भृत्यम् ॥ १४ ॥

(२) **कुमारललिता**— स्मृतौ विधिनिषेधौ श्रुतावपि न साधु ।
रमेश चरणौ ते सदैव शरणं नः ॥ १५ ॥

(३) **चूडामणिः**— संसारसागरतो भीतोऽहमादरतः ।
भक्तेष्टदानचणं भक्त्या भजामि हरिम् ॥ १६ ॥

(४) **हंसमाला**— अयुतार्कभमूर्तिर्द्विभुजा वामनस्य ।
स्फुरतु प्रातरन्तःकरणे मे सदैव ॥ १७ ॥

(५) **मधुमती**— स्मर जलदरुचं हरिमस्मृतमुचम् ।
दरहसितरुचा विजितहिमरुचम् ॥ १८ ॥

८—अनुष्टुप् छन्दसि,

(१) **विद्युन्माला**— मुक्तामुक्तब्रह्मेशाद्यैः नित्यध्येयं भक्तिज्ञेयम् ।
लक्ष्मीशाख्यं लक्ष्मीकुर्मो विद्यावेद्यं वस्तु ह्याद्यम् ॥

(२) **वितानमध्या**— भजे गजेन्द्रार्तिभेत्तुः भुजे द्विजेन्द्रस्य सक्तम् ।
मुदा चिदानन्दमूर्तेः सदा पदाम्भोजयुग्मम् ॥ २० ॥

(३) **सिंहलेखा**— नौमि नव्यमेघभास्वद्योगिभाव्यदिव्यदेहम् ।
शारदाब्जगर्वलोपि क्षेमदङ्घ्रिमब्जनाभम् ॥ २१ ॥

(४) **चित्रपदा**— हा भवतो भवतोऽन्यः को न्वविता भविता नः ।
केशव तं तव भृत्यं माधव मामव नित्यम् ॥ २२ ॥

(५) **हंसरुतम्**— चेतोभृङ्ग सुखहेतोः नित्यानन्दमकरन्दम् ।
नित्यं याहि शिवसेव्यं श्रीलक्ष्मीशचरणाब्जम् ॥

(६) **प्रमाणिका**— रविस्फुरन्मणिप्रभाविभासितोरुवक्षसम् ।
दरस्मितोपशोभिताननेन्दुमच्युतं भजे ॥ २४ ॥

(७) **नाराचकम्**— अत्यद्भुतं महाद्भुतं तत्त्वं ध्रुवं यदाः प्रभो ।
स्वप्ने मम ह्यभादृशोरग्रे महः कविप्रभम् ॥ २५ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(८) **माणवकम्**— गोपवधूवक्त्रविधुव्यूहलसन्मोहमणेः ।
अङ्घ्रिनखज्योतिरहो सत्यमिदं स्वप्नगतम् ॥ २६ ॥

(९) **समानिका**— भानुकोटिदिव्यरूप तावकी दयाऽद्भुतैव ।
यत्पदाब्जसन्नखाग्रमस्मदक्षिलक्ष्यमास ॥ २७ ॥

९—बृहतीछन्दसि,

(१) **भुजगशिशिभृता**—सदयहरिसुधासिन्धोः स्मितशिशिरकटाक्षोर्मीः ।
भवमरुभुवि खिन्नं मां श्वसन गमय शीघ्रेण ॥ २८ ॥

(२) **गुर्वी**— प्रणम्य नृहरेऽर्थये त्वां प्रसीद मयि भोः कृपाळो ।
सदैव मम हृत्सरोजे वसेह रमया सुखेन ॥ २९ ॥

(३) **भद्रिका**— विष्णुरत्र हृदये मम व्योमगो विजयते ध्रुवम् ।
तत्पदी सरति मन्मुखाद्वीरिति भ्रमति तां जनः ॥

(४) **मणिमयम्**— श्रीश तव कारुण्यसरिन्निस्सरति निस्सीमगतिः ।
साधु मयि नो चेन्मम किं वागमृतकुल्यैव भवेत् ॥

(५) **हलमुखी**— श्रीश ते चरणयुगळं चेतसो भवतु निगलम् ।
ध्यायतो मम तत इतो धावतोऽतिचपलतया ॥

१०—पङ्क्तिछन्दसि,

(१) **पणवम्**— शक्तानां विषय विरक्तानां
भक्तानां भवभयमुक्तानाम् ।
युक्तानां स्मितमधुसिक्तानां
पादाब्जे तव न च मुह्यामः ॥ ३३ ॥

(२) **मयूरसारिणी**— वल्लवीकुचान्तरालभास्व-
द्दिव्यकुङ्कुमानुरञ्जितं यत् ।
सर्वदैव सत्सुखाय चेत-
श्चिन्तयाच्युताङ्घ्रिपल्लवं तत् ॥ ३४ ॥

(३) **चंपकमाला**— पान्तु विशालाः पत्रविलोला
यामुनवेलापुण्यतमालाः ।
नन्दसुबालानङ्गजलीला-
साक्षिसुनीलक्ष्मातलमूलाः ॥ ३५ ॥

(४) **मत्ता**— चेतोभृङ्ग त्यज भवरङ्गं
चिन्तातन्तौ न हि भज भङ्गम् ।
ज्ञात्वा नित्यं भज सुखपूर्त्यै
ज्ञानानन्दद्युतिबलसारम् ॥ ३६ ॥

(५) **दीपकमाला**— दारसुताद्यैः स्वार्थशोचिभिः
देहवियोगे किं नु मे भवेत् ।
प्राणसखो मां पाति योऽनिशं
पार्थसखं तं प्रत्यहं भजे ॥ ३७ ॥

(६) **मनोरमा**— रहसि यो रमामुजान्तरे
स्फुरति साऽपि यद्भुजान्तरे ।
अलितटिद्वदब्जवान्तरे
जयसु सोऽद्य मन्मनोन्तरे ॥ ३८ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(७) **शुद्धविराट्**-- लक्ष्मीनायक ते पदाम्बुजे
सक्कोऽयं मम चित्तषट्पदः ।
शान्तो विन्दति शाश्वतं सुखं
नान्यद्वाञ्छति नश्वरं पदम् ॥ ३९ ॥

(८) **उपस्थिता**-- संसारसरस्वति सारवत्
कंसारिपदाम्बुजसेवनम् ।
पुंसामिति साधुगतं ततः
संसाधय चित्त तदन्वहम् ॥ ४० ॥

(९) **हंसी**-- एकं ज्योतिर्जयति सकले
तस्मादन्यत्किमपि न परम् ।
तत्र स्वान्त प्रविश सततं
मोहध्वान्तं त्यजसि विततम् ॥ ४१ ॥

११—तृष्टुप्छन्दसि,

(१) **वृत्ता**-- कमलनयन करुणासिन्धो
श्रवसि कलय मम विज्ञाप्यम् ।
तव चरणकमलयोर्भक्तिं
वितर विमलसुदृढां नित्यम् ॥ ४२ ॥

(२) **उपस्थितम्**-- हरे तव पदद्वन्द्वप्रसक्तं
मनो मम यदि द्वन्द्वाप्रसक्तम् ।
कुतो जनिमृतिद्वन्द्वप्रसक्तिः
कुतो मतिसुखद्वन्द्वाप्रसक्तिः ॥ ४३ ॥

(३) **शालिनी**-- भोभोश्चेतष्षट्पद त्वं शृणूच्चैः
वाचोऽस्माकं ह्यस्ति चेत्ते रिरिंसा ।
भक्त्याऽजस्रं देवदेवस्य विष्णोः
पादाम्भोजं याहि मुक्तान्यसङ्गः ॥ ४४ ॥

(४) **वातोर्मिः**-- भोभोस्स्वान्त त्यज संसारचिन्तां
तस्य श्रीशः स्थितिसंहारकर्ता ।
तिष्ठत्यन्यस्तमुपैहि प्रयत्नात्
तत्कारुण्यात्तव निर्वाणसिद्धिः ॥ ४५ ॥

(५) **इन्द्रवज्रा**-- पद्मेश ते दर्शय पादपद्मे
तत्सारलिट् स्वान्मम चित्तभृङ्गः ।
अल्पेषु भूरिक्षुदनल्पयत्नोऽ-
प्यप्राप्य कामं वलतेऽतिखिन्नः ॥ ४६ ॥

(६) **उपेन्द्रवज्रा**-- हरेहरे तेऽद्भुतदिव्यरूपं
विचिन्तयेऽहं हृदि नित्यमेव ।
तवैव कारुण्यवशादयत्ना-
दिदं न यत्नादपि योगिसाध्यम् ॥ ४७ ॥

(७) **उपजातिः**-- अहो मयि त्वत्करुणा मुरारे
गूढोरुशास्त्रार्थविचारमूढे ।
हृदम्बुजे मे रमया सह त्वं
विक्रीडसे यत्सुभृशं सदैव ॥ ४८ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(८) तोटकं-- एहि ममाद्य हृदम्बुजगेह-
न्यस्तसुवर्णमणीमयमञ्चे ।
श्रीश सहोपविशेन्दिरयोर्व्या
त्वाऽनुसरन्त्वभितः प्रतिहाराः ॥ ४० ॥

(९) स्वागतं-- स्वागतं त्रिभुवनेश तवाद्य
श्रीनिधेऽखिलचराचरधाम्नः ।
एकरूप बहुरूप नमस्ते
दिव्यरूप निगमागमवेद्य ॥ ६० ॥

(१०) मौक्तिकमाला--मस्तकविन्यस्तमणिकिरीटं
गण्डचलत्कुण्डलमणिमीळे ।
कण्ठलसत्कौस्तुभमजितश्री-
मौक्तिकमालोल्लसदुरसं त्वाम् ॥ ९१ ॥

(११) श्रीवृत्तं-- मौक्तिकमालात्विषि वनमाला-
सौरभलोभाद्भ्रमदलिमाला ।
तत्स्मितशोभाशिशिरकटाक्ष-
श्रीभृतसख्या स्वनति सलीलम् ॥ ९२ ॥

(१२) सैनिका-- कङ्कणादिकोलसत्करस्फुर-
च्चक्रशङ्खसद्गराभयश्रियम् ।
श्रोणिसूत्रनिर्जितेन्द्रकार्मुकं
हंसकोज्ज्वलाङ्घ्रिमाश्रयेऽच्युतम् ॥ ९३ ॥

(१३) भद्रिका-- स्फुरति हरिरिह श्रिया पुरः
कनकवसनशोभिविग्रहः ।
तरुणतरणिदीधितिस्फुर-
त्सुरपतिमणिशैलराडिव ॥ ९४ ॥

(१४) सुमुखी-- कनकमणीमयपीठतले
स्फुरति तवारुणपादतलम् ।
मुरहर चारु सुमेरुतले
विनिहितविद्रुमपीठमिव ॥ ९५ ॥

(२५) भ्रमरललिता-- कोटीराद्याभरणसमुदये
श्यामाङ्गस्त्वं सकनकवसनः ।
लक्ष्मीकान्त स्फुरसि मणिमये
मेरुत्सङ्गे सतटिदिव घनः ॥ ९६ ॥

(१६) रथोद्धता-- ईदृशं वपुरचिन्त्यवैभवं
हा रमेश तव पार्थसारथे ।
तां दशां कथमवाप संयुगे
श्रान्तवाहपरिसेवनोचिताम् ॥ ९७ ॥

१२—जगतीछन्दसि

(१) जलधरमाला-- श्रीभूमध्यस्फुरदुरुकोटीरश्री-
भास्वद्दिव्याकृतिरियमम्भोजाक्ष ।
धत्ते शोभां तव नवनीलाब्जाभा
विद्युद्वल्लीवलयितनीलाभ्रस्य ॥ ९८ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(२) पुटः-- तव मृदुपदपद्मे प्राप्तसङ्गो
विषमविषयभोगे त्यक्तसङ्गः ।
पिबति मधु यथेष्टं निश्चलाङ्गो
ह्यजित हृदयसंज्ञः कोऽपि भृङ्गः ॥ ५९ ॥

(३) वैश्वदेवी-- ब्रह्मेशेन्द्रार्चितं भूतिहेतोः
श्रीभूहस्ताब्जैर्लालितं श्रीपते ते ।
पादाम्भोजं तच्चित्तकासारसीक्षि
स्वानिन् हंसाचैरङ्कितं शोभते मे ॥ ६० ॥

(४) भुजङ्गप्रयातं-- हरे त्वत्पदाम्भोजमम्भोजविद्विट्-
प्रभाभासुरोद्यल्लवश्रीमनोज्ञम् ।
हृदम्भोजमध्ये ममाद्य प्ररूढं
करोतीति नाश्चर्यमाश्चर्यवृद्धिम् ॥ ६१ ॥

(५) मणिमाला- पादेऽत्र विदोषा भूमंस्तव योषा
माहात्म्यविशेषान्यान्वेत्ति सदैषा ।
तान्वेत्तुमशेषान् ब्रह्माद्यनिमेषाः
यत्ता न सशेषाः शक्ताः किमु शेषाः ॥

(६) तामरसं- मुरहर तावकपादसरोजे
मम चलचित्तमधुव्रतकेलिः ।
जायति चित्रमरिद्धरवेणीं
कलयति सापि सदातिजडं माम् ॥ ६३ ॥

(७) नवमालिनी- जयति तवाङ्घ्रिपञ्जरगतो मे
मुरहर सोऽद्य मानसमरालः ।
परमसुखस्य किं भवति भूयो
विषयविषाशये रतिरमुष्य ॥ ६४ ॥

(८) कुसुमविचित्रं- नखमणिदीप्त्या जितविधुलेखे
मुरहरहृत्वे मम विजयेते ।
वनरुहवज्राध्वजमुखरेखा-
रुचिरतले ते पदकमले ते ॥ ६५ ॥

(९) स्रग्विणी- यज्ञदानादिहीनस्य दीनस्य मे
श्रीश भावत्कपादारविन्दस्मृतेः ।
साधनं नान्यदस्तीति मन्ये हरे
घोरसंसृत्यकूपारपारास्तये ॥ ६६ ॥

(१०) प्रमुदितवदना- प्रहसिततरुणारुणाब्जोदयं
प्रमुषितशरणार्थितापत्रयम् ।
प्रभुवर तव नौमि पादद्वयं
प्रतिदिनमविमुक्तधामत्रयम् ॥ ६७ ॥

(११) प्रभा- न नखरुचिरियं ध्रुवं श्रीपते
मम हृदयमलं प्रमार्ष्टु ह्यलम् ।
तव पदकमलं जगत्पावनीं
सृजति बत पुनर्वियन्निम्नगाम् ॥ ६८ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(१२) पञ्चचामरं— हरे तवाङ्घ्रिसन्नखेन्दुचन्द्रिका
हृदम्बरे मम स्फुरत्यहर्निशम् ।
चरन्ति कामलोभमोहतस्कराः
निरुद्यमा विशेषतो विशुष्किताः ॥ ६९ ॥

(१३) इन्द्रवंशा— चित्रं चरित्रं तव चित्स्वरूपिण-
स्सान्द्रातपेनाङ्घ्रिनखेन्दुजन्मना ।
हृत्पुण्डरीकं मम यद्विनिर्मलं
विष्वक्सृतानन्दरसं विराजते ॥ ७० ॥

(१४) वंशस्थवृत्तम्— अहो महत्याश्रितपक्षपातिता
तवाच्युतोदारमहिम्न ईशितुः ।
प्रपन्नमेनं परिपासि यत्सदा
वसन् हृदब्जे गुणगन्धवर्जितम् ॥ ७१ ॥

(१५) ततिः (मालतीवा) अहह फणीन्द्रफणाग्रसीमनि
स्फुटममरेड्य बभूव यत्पुरा ।
जयति तदीश तवाद्य ताण्डवं
मम हि मनोहिफणाग्रसीमनि ॥ ७२ ॥

(१६) ललिता— संसारदुर्विषयया मुनहृदात्
निष्कासयन् मम मनोहिपुङ्गवम् ।
त्वत्पादचिन्तनमहाध्वि सङ्गतं
विष्णो त्रिधेह्यभियमाङ्घ्रिमुद्रया ॥ ७३ ॥

(१७) प्रियंवदा— जयति मे महति चित्तपञ्जरे
सुदृढभक्तिशुभयष्टिसुन्दरे ।
हरिपदाम्बुरुहसंभृतादरः
कनकहंसकवरस्सनूपुरः ॥ ७४ ॥

(१८) हतविलम्बितम्— तव पदाम्बुजपार्श्वचतुष्टये
यदिदमच्युत गुल्फचतुष्टयम् ।
तदवितुं मदभीष्टचतुष्टयं
ध्रुवमभूच्छतचन्द्रचतुष्टयम् ॥ ७५ ॥

(१९) उज्ज्वला— हृदि मम जयतीह सुजङ्घयो-
र्युगलमतिरतीशनिषङ्गयोः ।
तव हृतकलिकलमषसङ्घयो-
रजित विहितसुप्यनुषङ्गयोः ॥ ७६ ॥

(२०) तोटकम्— कमलामलपाणिसरोजयुगं
गलिताङ्गुलिसन्मणिभूषमलम् ।
रहसीश निषेवत एव सदा
तदिदं तव जङ्घिकयोर्युगलम् ॥ ७७ ॥

(२१) प्रमिताक्षरम्— हरिजानुयुग्म विहरात्र सुखं
मनुजावतारशिशुभावकृतात् ।
तव चङ्क्रमाद्धि वनराजिमिषाद्
घनरोमहर्षमगमद्धरणी ॥ ७८ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(२२) **बलोद्धतगतिः**— करीन्द्रकरजित्तदोरुयुगलं
विभाति लटि मे रमेश बहुलम् ।
स्वकैरपि गुणैर्नवाम्बरगुणै-
स्सुपर्णभुजयोस्तपःफलमिदम् ॥७९॥

(२३) **चन्द्रवर्त्म**— ध्यातुरस्य नृहरेर्मणिरशना-
दामनद्धपटशोभिकटितटः ।
धातुचित्रकनकाद्रिकटक-
द्योति चित्तसुवर्त्मनि सततम् ॥८०॥

(२४) **मौक्तिकदाम**— जिगेति विभो तव नाभिसरोज-
मजस्य चतुर्दशलोकसृजोऽस्य ।
जगत्त्रयसृष्टिनिदर्शनकोश-
निगूनमुदीक्ष्य मनो मम हेति ॥८१॥

१३—अतिजगतीछन्दसि

(१) **क्षमा**— तनुतरमुदरं वीक्ष्य विश्वम्भरं
कथमिति मा चित्त चिन्तां कृथाः ।
श्रुतिरिह नृहेरः कृत्यमत्यद्भुतं
वदति हि तदिदं किन्तु न स्मर्यते ॥८२॥

(२) **प्रहर्षिणी**— तद्गाढं रहसि रमाभुजोपगूढं
भो नाथ त्रिवलिचिताब्धिभङ्गसङ्गम् ।
व्यावल्गत्तरलमणिश्रियोदरं ते
भातीदं मनसि ममेन्द्रनीलशोभम् ॥८३॥

(३) **मत्तमयूरम्**— सश्रीवत्सश्रीतरुणीकौस्तुभभेनं
व्योमेवाभ्रच्छेदतडिद्भानुमनोज्ञम् ।
वक्षोदेशं तावकनालोक्य मनो मे
केकानादं मुञ्चति हर्षान्नमालिन् ॥८४॥

(४) **नवनन्दिनी (कुटजवा)**—तव बाहुपञ्चफणभोगिचतुष्कं
जयतीश भूषणमणिद्युतिचित्रम् ।
धृतचक्रतोयजनराभयमस्म-
त्पुरुषार्थकोशपरिरक्षणदक्षम् ॥८५॥

(५) **उपस्थितम्**— विभाति तव दक्षोर्ध्वारुणकराब्जे
स्वभक्तजनरक्षोद्युक्तमुरुचक्रम् ।
सदैव कमलाक्षोद्यद्विशताभं
लटीह मम रक्षोभीममभयाय ॥८६॥

(६) **कुटिलगतिः**— विधुरिव शोभते श्रीश वामोर्ध्वके
तव करपङ्कजे पाञ्चजन्यो महान् ।
जयति महारणे जातु यस्य स्वनः
श्रितजनतोषणः शत्रुलक्ष्मीषणः ॥८७॥

(७) **चन्द्रिका**— न हि तव वरमुदेति वाणी मृषा
वृषभगिरिजुषो यत्सतां द्राक्सदा ।
स्थिरपदयुगदानाय जान्वन्तिके
जयति सदय दक्षेतराधःकरः ॥८८॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(८) **मञ्जुहासिनी**– स्वदक्षिणाधःकरसरोजसंभृता
ह्यभीतिमुद्राऽखिलसुभद्रदायिनी ।
विभाति सेयं तव हरे हृदि स्थिता
निरीक्ष्य यां श्रीर्भवति मञ्जुहासिनी ॥८९॥

(९) **मञ्जुभाषिणी**– तव को नु वेद भुजवीर्यमद्भुतं
त्रिदशा अमी विमलभक्तिसन्नताः ।
असुराश्च दर्शनत एव संहताः
समरस्तु तैर्जयति लीलयैव हि ॥९०॥

(१०) **रुचिरा**– भुजानिमांस्त्रिभुवनरक्षणक्षमा-
नजोत्तमा रहसि रतोत्सवे रमा ।
स्मितोपमै रुचिरपटीरकर्दमै-
र्निजैर्भुजैर्जयति लिम्पती विभोः ॥९१॥

१४—शक्करीछन्दसि,

(१) **हंसश्रेणी**– स्कन्धासक्तैर्नवविधमणिहारव्रातैः
त्वद्यद्योतो जलधिजमणिशोभाहेतुः ।
आकारेण क्रमुकदरविजेता विष्णोः
कण्ठो द्रष्टुः कलयति मम हर्षोद्रेकम् ॥९२॥

(२) **कुटिलम्**– हरिनीलक्षितिधरशिखरे सन्ध्याभ्रे
यदि चन्द्रद्युतिरतिविमला दृश्येत ।
दरहासद्युतिरधरपुटे वक्त्रे ते
कथमेषा स्मृतिपथमज नागच्छेत्तु ॥

(३) **असंबाधा**– श्रीशादर्शाभे प्रतिफलति कपोले ते
प्रान्तश्रोत्रान्ताभरणमणिद्युणियूहे ।
भीतेवाभूच्छ्रीः किमियमधरमुद्रा मे
क्रीडासक्ता वा सरसचरणमुद्रेति ॥९४॥

(४) **वसन्ततिलका**– नासा तव स्फुरति माधव मामकानि
नानाविधानि दुरितानि दुरुद्धराणि ।
नाशाग्निसंज्वलनकृद्धमनी प्रदग्धुं
कामादिवैरिकरियूथवधे शतघ्नी ॥९५॥

(५) **लोला**– श्रीभूदर्शनलोले भक्तानुग्रहशीले
ताराषट्पदनीले श्वेताम्भोजस्थलीले ।
कृष्णोरुद्युतिजाले कारुण्यामृतशाले
दृश्येते सुविशाले नेत्रे तेऽद्भुतलीले ॥९६॥

(६) **इन्दुवदना**– श्रीरमण भोस्तरुणसत्किरणजालैः
भानुरिव भृङ्गरवशोभिनवपद्मम् ।
अक्षि तव हर्षयति शुद्धमतिभेदं
वेदरवसिद्धनवभक्त्यनुवशं माम् ॥९७॥

(७) **जगती**– अज्ञान् प्राज्ञान् कलयति सुधिरां वेदने
रिक्तान् पूर्णानमलनिजगुणैस्सज्जनान् ।
बद्धान् मुक्तानपि च भवगुणैस्सद्धियौ
मूढान् प्रौढान् मुरमथन कटाक्षस्तव ॥९८॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(८) अपराजिता— किमु करिकलिते कृपाम्बुधिवीचिके
किमु लिखितजये विमुक्तिपताकिके ।
चलदलिमिलिते स्फुटे किमम्बुजे
किमजित नयने तवोज्ज्वलतारके ॥९९॥

(९) वसुधा— मधुराधरमीक्ष्य गतं श्रुतेः सविधं
कमलामवलोक्य ततो ह्रियाऽपगतम् ।
विहितं कृतमीश तवाक्षितारकया
विजने किल वक्तुमभीप्सितं ह्युचितम् ॥

(१०) ध्रुवम्— चरणरतिं विसृज्य विषयानटतो
ह्यतिचपलस्य दुर्धरजवस्य सदा ।
मम मनसो रमेश तव वज्रदृढं
भवतु कृपानिधेऽक्षियुगलं निगलम् ॥१०१॥

(११) प्रहरणकलिका— क्षणमिह शरणार्थिनि भवतरणे
शुभगुणवरुणालय धृतचरणे ।
कुरु मयि तरुणाम्बुजदलरुचिरे
तव नवकरुणारसभरितदृशौ ॥१०२॥

१५—अतिशक्करीछन्दसि.

(१) कामक्रीडा— देव भ्रूभङ्गस्ते सत्यं सृष्टिस्थित्यन्तादीना-
मेकः कर्ता नित्यं लोकैः साकं लोकेशादीनाम् ।
ब्रह्मेशाद्या ये सृष्ट्यन्तादिष्वत्यन्तासक्ता-
स्तस्यैवाज्ञाभिज्ञा राज्ञो यद्वद्भृत्यास्ते विष्णो ॥

(२) शशिकला— विकचकुवलयसरुचि निटिलतटं
स्फुरति पुरहरविजयविशिख तव ।
निकटमणिमयमकुटमहसि बला-
र्यसितमणितटमिव वरसुरगिरेः ॥१०४॥

(३) स्रक्— निटिलगलितकुटिलचिकुरनिकरं
विपुलनयनविजितविकचकमलम् ।
हसितसुपरिहसितमृदुशशिकलं
स्फुरति मदनजनकवदनमतुलम् ॥१०५॥

(४) मणिगणनिकरम्—प्रदिशति मम तव सदय तदतसी-
स्तबकगतमधुपततिरुचिरमिदम् ।
निटिलतटघटितमृगमदतिलकं
मकुटगलदसितमणिकिरणधियम् ॥१०६॥

(५) चन्द्रकान्ता— नो तवैतल्ललाटं श्रीशाष्टमीचन्द्रखण्डं
नो मृगीनाभिपुण्ड्रः श्चान्द्रो मृगोतिक्षुधोत्थः ।
नो किरीटान्तसक्तास्तत्कान्तिकान्तालकन्ताः
मेरुशृङ्गान्तरूढा दूर्वाङ्कुरा एव नूनम् ॥१०७

(६) मालिनी— शिरसि मकुटमेतत्कृष्ण ते रत्नचित्रं
नहि नहि किमु तर्हि स्वाक्षितृप्तयै ध्रुवं तैः ।
बलभिदुपलशैलस्याग्रतो मेरुशृङ्गं
मणिमयमुपनीय क्षिप्तमस्वप्नसङ्घैः ॥१०८॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(७) **चन्द्रलेखा**– दर्शंदर्शं यदेतत्त्वन्मातरो बालभावे
कौसल्याद्याः कृतार्थाः स्वानन्दसिन्धौ निमग्नाः ।
तत्ते वक्त्रं हृदब्जे सञ्चित्यसञ्चित्य नित्यं
स्वामिन्नत्रैव पश्याम्यानन्दसिन्धुस्वरूपम् ॥१०९

(८) **ऋषभः**– कमला हरे तव सरोजदलायताक्षं
मणिकुण्डलद्वितयशोभितकर्णयुग्मम् ।
पिबतीव भाति मधुरस्मितशोभिगण्डं
वदनं दृशा मदनकार्मुकभासुरभ्रु ॥११०॥

(९) **एला**– दशनांशुभिर्दरमुकुलमिव निमेषात्
मणिभूषणद्युतिभिरथ पुनरतीव ।
परिदृश्यते विकसितमिव तव पार्श्वे
कमलं करे वरद जलधिवरपुत्र्याः ॥१११॥

(१०) **रमणीयकम्**– देवदेव तव दिव्यतनुद्रुममाश्रिता
श्रीलता जयति पाणिपदावरपल्लवा ।
कर्णपर्णकुसुमस्तबकायितभूषणा
केशभृङ्गपृथुलस्तनसत्फलशोभिता ॥११२॥

(११) **नलिनी**– ध्रुवमीश न सा कमला स्थिरदीप्तिमती
तटिदेव तवाम्बुदनीलतनोरुरसि ।
घनदीप्तिरपि क्षणदीप्तिरिति ग्रथिता
किमहं त्विति खेऽभ्रतपस्सफला चरति ॥११३॥

(१२) **प्रभद्रकं (सकेसरंवा)**– अजित तटिल्लतेयमिति चेन्न सा स्थिरा
प्रविमलतारकेति तु न सा निशाक्षये ।
कनकलतेति वक्तुमयि सा न चेष्टते
स्फुरति तवान्तिकेऽत्र कमलेव सा सदा ॥११४॥

१६—अष्टिच्छन्दसि.

(१) **वाणिनी**– अज मम दैन्यमीक्ष्य करुणारसार्द्रचित्ता
श्रितजनवत्सलाऽद्य वदतीव कर्णमूले ।
तव कमलाऽरविन्दनयनाऽऽशु पादमूले
पतितमिमं कृपालय निरीक्ष्य पालयेति ॥११५॥

(२) **पञ्चचामरम्**– सदा वराद् सदन्तिके हरेऽम्बुजेक्षण क्षणात्
मुदा नयामि यामि नो मदान्धनन्दिरं मुधा ।
अनुक्षणं त्वदीक्षणप्रतीक्षणात्तजागरः
सदा हृदा स्मरामि ते मुखारविन्दमादरात् ॥११६

(३) **मणिकलपलता**–तव जननी ऽदेहदक्षेतरपार्श्वगता
वरदकुटालोज्ज्वलश्यामलदेहरुचिः ।
अलिरुचिरालिकाऽद्य सत्पल्लवरम्यशया
विपुलसालपार्श्वमल्लीव विभाति मही ॥११७॥

४) **अश्वगतिः**– श्रीवर ताऽवरदिव्यसुधारसपानरता
सूरिह पश्यति भूरितृषेव मुखेन्दुममुम् ।
स्वीयकराम्बुजविभ्रमकैरवतोषदया
सुस्मितचन्द्रिकयोज्ज्वलकोमलदेहलता ॥११८॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(५) **वृषभगजम्**– श्रीरिव भूरपि स्फुरति मणिगणखचितैः
स्वर्णविभूषणैरपि वरद विमलगुणैः ।
भाति भिदा तयोस्तु तनुवसनकरलस-
द्विभ्रमपङ्कजद्युतिततिभिरतितराम् ॥११९॥

१७—अत्यष्टिच्छन्दसि.

(१) **मन्दाक्रान्ता**– श्रीभूदेव्यौ रुचिरमकुटीवज्रताटङ्कबाली-
पालीनासाभरणवलयव्रातकेयूरकान्त्या ।
हारश्रेणीतरलरशनाहंसमञ्जीरदीप्त्या
ध्वस्तध्वान्ते मनसि मम ते पार्श्वयोरीश भातः ॥

(२) **पृथ्वी**– श्रिया च धरया त्वया हृदयमन्दिरं मे सदा
विभाति नृहरे यथा न हि मुञ्च दिव्या चाब्धि धना
जगन्न च दिनश्रिया क्षणदया च हेमाद्रिणा
न च प्रथमसन्ध्यया चरमसन्ध्ययाऽह्ना तथा ॥१२१

(३) **नर्कुटकम्**– त्रिभुवनदेह देव रमया धरया च सदा
विहर पयोब्धिमध्य इव मे हृदयाम्बुरुहे ।
अलमितरेण तेन भवसिन्धुमहोर्मिमयः-
कणगणसंमितेन भुवि कामशतेन मम ॥१२२॥

(४) **कोकिलम्**– त्वमिह मनोम्बुजे मम पयोम्बुधिकन्यकया
विहर भुवा च भो विधिभवार्चितपाद सदा ।
वद मदपेक्षितं किमु ततोऽधिकमाप्यतमं
जगति यतो भवेदिह परत्र च भूरि सुखम् ॥

(५) **हरिणी**– मुखमिदमभूद्विप्रो भूमौ विभाति यतस्त्रयी
पुरुषवपुषो बाहू क्षत्रं यतो जगतोऽवनम् ।
भवति तदिमा ऊरू वैश्यस्सदैव यतःकृषिः
जयति चरणौ शूद्रो येन स्थितं परिचर्यया ॥

(६) **शिखरिणी**– अभूत्प्राणाद्वायुः पुरुषवर ते दैवतपते
मुखादिन्द्रो वह्निर्वरद शिरसो द्यौश्च जनिताः ।
श्रुतेराज्ञा नाभ्याः खमपि मनसश्चेन्दुरभव-
त्पदाभ्यां जज्ञे भूरपि च नयनादम्बरमणिः ॥

(७) **षट्चरणकम्**–अनुदिनमच्युतान्तिकलसत्कलत्रयुगलः
प्रणयसुरभिभिर्दृढनिबद्धपादयुगलः ।
मम हृदि निश्चलेऽत्र निवसन्गृहाण महितां
सदय समर्हणां सभयभक्तिकम्पविहिताम् ॥१२६

(८) **वंशपत्रपतितम्**–आसनमाश्रायस्य जगतां कथमिदमिति मे
मानसमेति भीतिमनिशं मणिमयमपि तत् ।
भक्त्युपनीतमल्पमपि तत्प्रियमिति भवतो
वेद्मि मतं ततोऽर्पितमदः शुभगुणजलधे ॥१२७॥

(९) **पञ्चचामरम्**– हरे तवार्घ्यमर्पयन् करद्वये मुदा सदैव
रथाङ्गशङ्खपङ्कजादिरेखिका विलोकयामि ।
पदोश्च पाद्यमर्पयन् स्पृशामि तत्तले पटेन
तयोस्स्फुटाशनिध्वजाङ्कुशादिरेखिका दृशा च ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

१८—धृतिच्छन्दसि.

(१) अलसा— इदमिदमुपनीतमन्यज्जलं स्वच्छमाचम्यता-
मज मितविभवेन तूर्णं मणीपीठमागम्यताम् ।
स्नपनकलशभाजनस्थैर्वरैस्त्वर्चितैस्सत्पयो-
दधिघृतमधुशर्कराद्यैर्जलैश्चाभिषेकोऽस्तु ते ॥१२९

(२) कुसुमितलतावेल्लिता— वर्षाकालाभ्रस्तनितसुभगैर्वाद्यशब्दैः सुराणां
केकासंनादस्मरणजनकैस्स्तोत्रनादैर्मुनीनाम् ।
स्पष्टोच्चारेण श्रवणमधुरैर्वेदघोषैर्द्विजानां
स्वामिन् मत्स्वान्ते जयतु सततं तेऽभिषेकोत्सवोयम्॥

(३) सुधा— सदास्नातो वासोभिरपि मणिभास्वद्भूषणशतैः
वरैर्गन्धैर्माल्यैश्च सुरुचिरमालत्यादिरचितैः ।
तथा धूपैर्दीपैश्च बहुविधभक्ष्यान्नाम्बुतरसैः
मम स्वान्ते शान्तेऽत्र विहर सुतुष्टः सचरहरे॥१३१

१९—अतिधृतिच्छन्दसि.

(१) मेघविस्फूर्जिता— यथा सद्यो ह्यद्यो दिवि भुवि भवेत्सर्ववाद्यप्रणादो
यथा स्युर्द्रागेवा मुकुलितकरा ब्रह्मरुद्रेन्द्रपूर्वाः ।
यथा सर्वाङ्गानां वरद युगपद्दर्शनं ते मम स्यात्
तथा भक्त्युद्रेकाज्जयतु सततं देव नीराजनं ते ॥

(२) शार्दूलविक्रीडितम्— स्तुत्वा स्तोत्रशतैः प्रदक्षिणनमस्कारांश्च कृत्वा मुहु-
स्तन्न्यूनाधिक्योस्समीकरणमप्याराधने प्रार्थयन् ।
तत्सर्वं च हरे मरुत्कृतमिति त्वत्प्रीतये चिन्तयन्
भक्त्या नित्यमनेन मोदमुपयाम्यन्यन्न मे वाञ्छितम्॥

२०—कृतिच्छन्दसि,

(१) सुवदना.

देव त्वत्तोऽस्य सर्गस्थितिलयनियतिज्ञानादि निखिलं
बन्धो मोक्षश्च नित्यं विधिगरुडफणिन्यक्षादिजगतः ।
तस्य श्रीशस्य विष्णोस्तव शुभचरणौ प्राप्तोऽस्मि शरणं
भक्त्या भृत्योऽस्मि मृत्योर्भयमपि नहि मे क्वास्त्यन्यजभयम् ॥१३४॥

(२) वृत्तनाम.

देवदेव केशवादिपूरुषेश माधवीशवीशवन्द्य
मानभव्य नव्यनीरजोरुगर्वलोपिरम्यपादयुग्म ।
त्वां नमामि साधुसेव्य दिव्यनीरदाभदेह सर्वदैव
देहिदेहि ते पदाब्जभक्तिमेव मुक्तिहेतुमच्युतेति ॥१३५॥

२१—प्रकृतिच्छन्दसि,

(१) स्रग्धरा.

देहोऽत्यल्पोऽस्य चेतस्त्वतिचलमवशान्येव पञ्चेन्द्रियाणि
स्वामिन् धीरप्यसूक्ष्मा गतिरपि गहना कर्मणस्तद्विचारे ।
नाहं शक्तोऽस्मि कर्तुं किमुत सुरगुरो यद्यमुष्मिन् दया ते
पादाक्रान्ते प्रसीद प्रदिश पदयुगे भक्तिमेकां विशुद्धाम् ॥१३६॥

२२—आकृतिच्छन्दसि,

(१) प्रभद्रकम्.

देव तवाच्युताङ्घ्रियुगलं सदा हृदि विचिन्तयन् सुविमलं
शाश्वतसंविदादिसुगुणान् यथामति विचारयन् दिनगणान् ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

श्रीश नयामि चेदलमलं क्षितावपि ममाद्य जन्म सफलं
नो यदि तद्ध्रुवं सुविपुले त्रिविष्टपतलेऽपि जन्म विफलम् ॥१३७॥

२३—विकृतिच्छन्दसि,

(१) अश्वललितम्.

तव जलजातजातगरुडद्विज्जिह्ववरशर्ववासवमुखाः
निखिलसुरास्समेत्य बहुशो विचार्य चरणाब्जरेणुविभवम् ।
त्वयि विपुलां रतिं दधति ते तदप्यहह तारतम्यमतुलं
जयति सुरेषु न त्वयि हरे तदेतदज वेत्तृबुद्धिजनितम् ॥१३८॥

(२) मत्ताक्रीडम्.

नाभीस्रोद्भूतस्तेऽब्जो बत सृजति भुवनमचरचरमयं
वक्त्राज्जातः शक्रो बहोरनुभवति महितमखविहितहविः ।
नेत्रोत्पन्नस्सूर्योऽजस्रं दिवि किरति तरुणकिरणसमुदयान्
चितोद्गीर्णश्चन्द्रो नृणां हृदि वमति विषमशरशरानेचयान् ॥१३९॥

२४—सङ्कृत्यां छन्दसि,

(१) तन्वी.

अस्तु समस्तं गृहधनदनिताज्ञातिसुतप्रियपरिजनवृन्दं
मास्तु ममात्र स्वमतिरज भवन्यस्तनिजस्थितिविलयविसर्गे ।
अस्त्विह देहे परगृह इव मे भीतिरहंमतिरभयद मास्तु
प्रीतिरिहास्तु स्थिरचरविषये विस्मृतिरत्र तु तव मम मास्तु ॥१४०॥

२५—अतिकृत्यां छन्दसि,

(१) क्रौञ्चपदा.

देव ममैतत्सर्वमभीष्टमसुरतिभिरहर तव गुरुकृपया
लभ्यमसौ च प्रीतिकरोरुशुभचरितहृषित निजगुरुकृपया ।
सा च तवेश प्रीतिबलेन जगति भवति बत विबुधवरगुरो
श्रीश ततोऽहं यामि तवैव चरणयुगलमिह शरणमव विभो ॥१४१॥

२६—उत्कृत्यां छन्दसि,

(१) भुजङ्गविजृम्भितम्.

पद्मेशाहं पापासक्तः क्षणमपि सुजनमनुसरन् नहि श्रुतवान् हितं
कामक्रोधव्याव्याविष्टो हितमिदमहितमिदमिति स्वयं च न बुद्धवान् ।
अज्ञानाख्ये गाढध्वान्ते भवगिरिकुहरतलगतो गतिं च न लब्धवान्
कारुण्याब्धे वीक्षाशक्त्या शरणद चरणनिपतितं समुद्धर मां विभो॥१४२

(२) अपवाहाख्यम्.

एषा वेङ्कटकविवरवदनजनितफणितिमयसमसुवृत्तानां
माला सद्धृदयकमलविहरदमरवरदयितसुगुणमुक्तानाम् ।
यस्त्वेतां सततमुषसि हृदि कलयति मुहुरपि च बत तदर्थानां
चर्चामुद्वहति स रतिमजिताचरणनलिननखमणिघृणौ धत्ते ॥१४३॥

इयं वेङ्कटसूरिविरचिता समवृत्तमाला समाप्ता.

॥ श्री कृष्णार्पणमस्तु ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



॥ श्री श्रीनिवासाय नमः ॥

श्री नौका चरित्रम्.

प्रथमस्सर्गः.

श्रियं नः श्रीगौरीवदनवनजार्को वितरतु
श्रितानां सन्तानो द्विरदवदनोऽप्येकरदनः ।
प्रभूतप्रत्यूहाचलदलनदम्भोलिरनघः
प्रभातप्रोन्मीलन्नलिनमदहृङ्कारिचरणः ॥ १ ॥

तथा मे माधुर्यं किर वचसि वागीशदयिते
दयापूर्णापाङ्गे श्रितजननि देवा दिवि यथा ।
भवेयुर्माधुर्यं निमिषमनुभूयेदमतुलं
कणादेवास्याजन्यमृतमिति निर्धारितधियः ॥ २ ॥

यतो जन्मस्थेमप्रलयवदिदं विश्वमखिलं
यमाहु र्नीरूपं निगमनिपुणा रूपिणमपि ।
भजन्ते सम्मोदं निजमनसि यं वीक्ष्य यमिनः
स मे कल्याणाय प्रभवतु भवाम्भोधितरणिः ॥ ३ ॥

त्यक्त्वा सन्देहलेशं भयलवमभजन् लीलया सानुरागं
वाचातीतं विजेतुं हरिवहममलैर्वाग्विसर्गैर्यतिष्ये ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

यद्गोपीभिर्जनन्याऽप्यतिरभसमसौ यन्त्रितस्सप्रमोदं
सामर्षं विश्वमूर्तिः श्रितकृतकरुणो व्यामतो दामतश्च ॥ ४ ॥

याचे स्तुवन् कविवरान् कथयेऽहमद्य
नौकाविहारचरितं नृहरेः पवित्रम् ।
न्यूनातिरिक्तमिह यद्यददः समस्तं
क्षन्तव्यमेव ननु तैः करुणार्द्रभावैः ॥ ५ ॥

भूभारोत्तारणाय ग्रथितयदुकुले देवकीगर्भसिन्धौ
जातो यातो यशोदाप्रियतनुभवतां ह्लादयन् गोपकन्याः ।
ब्रह्मेशानामरेन्द्रप्रभृतिसुरवरैस्सादरप्रेक्षणीयां
नौकाक्रीडां वितेने हरिरहह सह स्त्रीभिराभिः सहेलम् ॥ ६ ॥

श्रुत्वा तस्य मुहुर्मुहुर्मुररिपोश्चारित्रमत्यद्भुतं
स्मृत्वा तच्च पुनःपुनः श्रुतिसुखं तस्यैव चिद्रूपिणः ।
तत्राभीरवधूजनैश्चिरधृतं स्वात्मीयगेहादिकं
ब्रह्मज्ञैर्निरहंममेरिव परं सर्वं ह्यहो विस्मृतम् ॥ ७ ॥

नूनं स्वतन्त्र इति नाम हरेः प्रसिद्धं
यत्तत्स्वभक्तपरतन्त्र इतीह जातम् ।
प्रागेव यद् व्रजवधूहृदयं विदित्वा
नौकाविहारकुतुकी स बभूव कृष्णः ॥ ८ ॥

R70

मुररिपुरथ धृत्वा वेणुमाधाय चोष्ठे
निजमुखमरुताऽसौ पूरयन् सप्रमोदम् ।
सकलनरमृगादीन् मोहयन् स स्वरं हा
सरिगमपधनीति स्वैरमुद्गायति स्म ॥ ९ ॥

अधरनिहितवेणोस्तस्य हस्ताग्रशाखा-
क्रमपिहितविमुक्तच्छिद्ररुद्धोत्थिताभिः ।
मधुरवसुधाभिर्निर्वृतं तत्र सर्वं
हरिविरहविहस्तस्त्रीसहस्रं विहाय ॥ १० ॥

हृष्यत्सु तत्र सकलेषु चराचरेषु
खेदं ययुर्युवतयस्त्विति यत्तदेतत् ।
तस्याधरं मधुरिपोर्मधुरं विलज्जा
काऽन्येयमद्य मुरली पिबतीति नूनम् ॥ ११ ॥

तद्वेणुगानामृतपानमत्ताः
विद्धा मुहुस्तद्विरहाङ्कुशेन ।
बीधीस्तमन्वेष्टुमुपागमंस्ताः
विष्वक्कटाक्षान्विकिरन्त्य एव ॥ १२ ॥

बीधीं ययौ सोऽपि मुदा तदानीं
फलाय कामं स्पृहयन्निवाशु ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

मुक्ताफलान्यञ्जलिना गृहीत्वा
प्रसारितापाङ्गतरङ्ग एव ॥१३॥

चलद्भिरलकैरथ क्षणवियोगसंयोगभृ-
न्मुखं ददृशुरग्रतो मुरहरस्य गोपाङ्गनाः ।
यथा दिवि चलद्घनैर्द्युततविमुक्तसंछादितं
तुषारकरमण्डलं तृषितसच्चकोराङ्गनाः ॥१४॥

दृष्ट्वा नवंनवमिवागतमच्युतं तं
हृष्टाः परं सपदि तत्र समेत्य सर्वाः ।
एह्येहि मे भज भुजान्तरमित्यनेन
साकं ययुर्युवतयोऽन्यविहारदेशान् ॥१५॥

हसन्ती सत्येका चलितपृथुवक्षोजयुगलं
सुमं विन्यस्यन्ती शिरसि सशिरःकम्पमपरा ।
समीकुर्वत्यन्याः स्वकरनखरैस्स्वैरमलकान्
ललन्त्यः प्रीत्यैवं प्रययुरभितः कृष्णमबलाः ॥१६॥

काचिच्चुम्बति काचिदाह्वयति तं काचिन्मुहुः प्रेक्षते
काचित्तर्जयति भ्रुवा समदनं काचित्समालिङ्गति ।
काचिद्दर्शयति स्तनौ स्वहृदयं व्याख्याति काचिद्दृशा
वीटीं काचिदुपाहरत्यथ हरेर्भाग्यं ह्यहो योषिताम् ॥१७॥

मामेवेच्छति मत्प्रियो मयि रतो मामीक्षते मत्प्रभु-
र्मानाथो मदनस्स्वयं मम गुरुर्मत्पूर्वपुण्योदयः ।
मत्प्राणा मम भूषणं मम धनं नाथोऽनुरूपो ममे-
त्यानन्दातिशयेन तत्र नृहरिं गोप्योऽन्वगच्छंस्तदा ॥१८॥

इति प्रणृत्यन् प्रहसन् प्रगायन्
आनन्दसिन्धौ सुभृशं निमज्जन् ।
नयन्नयोक्त्यैव हरिं तदाऽसौ
स्त्रीणां समाजो यमुनामगच्छत् ॥१९॥

अत्र क्रीडन्मरालीततधुतगरुदुद्भूतवातावधूत-
व्याकोचाज्जातजातोत्पतितमधुकरीव्रातसङ्गीतविद्याम् ।
संश्लाघन्ते शिरोभिस्तटतरुनिवहाः पश्यताऽऽगच्छतेति
प्रत्युद्गम्य प्रणीता इव मृदुमरुता ताः स्त्रियस्तामपश्यन् ॥२०॥

द्रुतं हंसभ्रान्त्या व्रजति वरटा सैकतमहो
मुहुः पद्माढ्यां स्मरति मधुपालिः स्वसुकृतम् ।
जलच्छाया साम्यं भजति हरिनीलस्य महसां
तरङ्गालिर्यस्याः स्पृशति मणिसोपानमसकृत् ॥२१॥

प्राप्य तामद्भुतां रम्यां कालिन्दीं काममोहिताः ।
कामिन्यः कामुकं दृष्ट्वा कृष्णमन्योन्यमब्रुवन् ॥२२॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

कुञ्जभ्रमद्भ्रमरझङ्कृतिटङ्कृताढ्यैः
श्लक्ष्णैर्लतागुणसुयोजितपुष्पबाणैः ।
प्रादुर्बभूव पिकनिस्वनवीरवादैः
मारो मृदुश्वसनसारथिरद्य कष्टम् ॥२३॥

मिहिरदुहितुरासां निर्निमेषं स्थितानां
पयसि रजतनौका दृक्पथे काऽप्यथाभूत् ।
शमयितुमरिवर्गं संश्रितानां हरौ द्राक्
व्रजति निमिषशून्या शेषशय्येव सिन्धौ ॥२४॥

राकाचन्द्रसमश्रीकां नौकां तां प्रेक्ष्य तज्जले ।
हर्षचिन्तासमायुक्ताः कान्ता ऊचुरिदं मिथः ॥२५॥

शक्यं विहर्तुमधिरुह्य सुखेन नीरे
नीले यमस्वसुरियं तरणिस्तु हृद्या ।
मुग्धाः कथं मुरारिपुर्विषमेऽत्र नेयः
बालो नृपालतनयो मणिभूषणोऽयम् ॥२६॥

मध्येनीरमयुक्तमस्य नयनं हा किं सुखं ते विना
किं वा वक्ष्यति नो रुषाऽस्य जननी को वाऽत्र निर्वाहकः ।
दुर्वादो भुवि दुर्जयो यदि भवेत् क्रीडाऽन्यथा स्यान्न किं
हा कष्टं हि वशे न तिष्ठति हरिर्नेयः कथं वा द्रुतम् ॥२७॥

इत्यालोच्य नभः प्रेक्ष्य रविरस्तं व्रजेदिति ।
गमने त्वरमाणास्ताः नौकामभिययुः स्त्रियः ॥२८॥

विनाऽऽत्मानं यियासून्नामनाहूतस्तदा हरिः ।
तासां व्यवसितं बुध्वा प्रोवाच तदिदं वचः ॥२९॥

गोप्यः किं पुरुषं विना क्वचिदपि स्त्रीणां श्रुतं साहसं
न स्थेयं तरुणीजनस्य विहतौ केनापि यूना हरे ।
हा किं ब्रूत बलाद्रसो न हि सुखं स्वप्नेऽपि तस्य क्वचित्
नैवं नः परयोषितस्तव वचो युक्तं विनोदेन वा ॥३०॥

युक्तं वोऽभिहितं मया युवतयः क्षेमाय नैवान्यथा
शक्तिस्तेऽद्य किशोर नूत्नतरणेः स्याद्वा न वा चालने ।
हा गोप्यो बत मद्विना तृणमपि क्षोण्यां चलेद्वा क्व वा
सत्यं यद्यपि चिन्तनीयमबला ह्याजानतो भीरवः ॥३१॥

नेताऽहमस्मि निखिलेन गवामिहैकः
स प्राणिनामिव हरिर्न विदुर्भवत्यः ।
न त्वं किशोर इति विश्वसनीयभावः
प्रख्यातमेतदयि किं न विदुः स्त्रियोऽमूः ॥३२॥

इति प्रत्युक्तिभिस्तासां प्रत्याख्यातोऽपि सादरम् ।
प्रत्ययार्थमिदं भूयो जगाद वचनं हरिः ॥३३॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

सत्यं मद्वचनं न पथ्यमिह वः क्रीडा जले सर्वथा
नावा वाऽपि भवेद्विना यदि मया सिन्धूद्संचारिणा ।
नित्यं स्यादयशो मुवीदृशमहो कृत्यं वधूभिः कथं
मा कार्यं ननु बोधनाबलमिदं हा कस्य न ज्ञायते ॥३४॥

श्रुत्वा वचः सपदि तस्य हरेस्तदेत-
न्मत्वाऽपि तथ्यमिति सर्वमहो विमुग्धाः ।
ध्यात्वा क्षणं चरितमस्य पुराऽनुभूतं
स्मृत्वा पुनर्वचनमीदृशमब्रुवंस्ताः ॥३५॥

मज्जन्तीनां रहसि पयसि स्वैरमर्कस्य पुत्र्याः
रन्ध्रान्वेषिन् न किमपहृतान्यंशुकानि त्वया नः ।
हा विन्यस्यन् तिलकमलिके त्वं पुरा सादरं मे
दुर्ज्ञेयात्मन्नधरमदशः किं न तद्विस्मृतं वा ॥३६॥

कियदिह नवनीतं भुक्तमित्येव पृष्ट-
स्त्वियदिति मम बाह्वोरन्तरं नास्पृशः किम् ।
स्मर नवनवनीतं भुक्तशेषं निधाय
क्व शठ मयि बिडालः प्रेषितो निद्रितायाम् ॥३७॥

आस्ये विलप्य गतवान्न किमङ्ग मे त्वं
भुञ्जान एव नवनीतमहो तदास्ताम् ।

नूनार्तवेऽप्यजसतीति सहैव सुप्ता
हा मे रहः किमकरोः स्मर वञ्चक त्वम् ॥३८॥

चोरश्चिरादिह गृहीत इति स्ववेश्म-
न्याधाय सम्यगरं स्थिरमेव बध्वा ।
गत्वा रयेण जननीसविधेऽपि सन्तं
त्वां वीक्ष्य किंकिमयि न स्मृतमङ्गनाभिः ॥३९॥

त्वद्वेणुगानकलया न वशीकृतः किं
यज्ञे पुरा स्मर स यज्ञवधूजनोऽपि ।
पौरैः पुरन्दरबलिं विरचय्य तुभ्यं
वर्षे महत्यपि चिरं वद न स्थितं किम् ॥४०॥

सत्यं मयोक्तमिति यद्वदसीह नस्त्वं
जानीमहे तदखिलं ह्यनुगन्तुमस्मान् ।
हा तेषु तेष्ववसरेष्वयि यद्यदुक्तं
तत्तन्न तथ्यमिति वा कुटिलं न तद्वा ॥४१॥

इति तासां हरिर्वाक्यैरर्दितः स पुनःपुनः ।
पुष्पवृष्टिसमस्पर्शैरिदं वचनमब्रवीत ॥४२॥

अप्रस्तुतैः किमु वचोभिरिहोपयुक्तं
मामेव संश्रितवतां किमु दुस्तरं स्यात् ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

मन्नाममात्रमवलम्ब्य तरन्ति लोकाः
संसारसागरमपीदृशसिन्धुरास्ताम् ॥४३॥

मग्नोऽम्बुधावपि मया न किमुद्धृतोऽद्रिः
ग्राहो गजेन्द्रमुपरुध्य न किं निकृत्तः ।
सोमश्च किं न निहतो निगमापहारी
काकोदरोऽपि किमितो न विवासितोऽभूत् ॥४४॥

पुत्रं निमीलितमहो पुनरेव भेजे
सान्दीपिनिस्तदपि किं न ममैव यन्नात् ।
ह्लाहुशौर्यमविकुण्ठितमप्रतर्क्यं
सत्यं ब्रवीमि तदलं हृदि संशयैर्वः ॥४५॥

इति तद्वचनं श्रुत्वा क्षणमालोच्य ताःस्त्रियः ।
सत्यमेवेति निश्चित्य तुष्टुवुर्मनसा हरिम् ॥४६॥

—* इति प्रथमः सर्गः समाप्तः *—

अथ द्वितीयस्सर्गः.

ततोऽतिधैर्यमालम्ब्य सहसा स वधूजनः ।
सन्ननाह तदा नौका मारोढुं सह शौरिणा ॥ १ ॥

अथ दिवमुपयान्तीः स्वप्रभाः भास्वतो वा
ह्यहमहमिकयाऽमूर्नावमारुह्य भान्तीः ।
सरभसमनुयाताः शौरिणा प्रेक्षितुं त-
न्नभसि च समवेतं स्वर्वधूभिः क्षणेन ॥ २ ॥

नीवीं सम्बध्य गाढं द्रुतगतिशिथिलं द्राक्समीकृत्य गात्रे
विन्यासं भूषणानां स्मितरुचिलहरीप्रस्फुरत्तारहाराः ।
स्कन्धाग्रात्केशपाशोच्छ्वसितसुमसराः सम्यगाकृष्य बध्वा
चेलान्तांस्तास्तदानीं झडिति युवतयः कर्णधारीबभूवुः ॥ ३ ॥

जल्पन्त्यो नृहरेः कथां सुमधुरां संप्रार्थयन्त्यो नदीं
खेलन्त्योऽच्युतभावनार्थितमिथस्संश्लेषणादिक्रियाः ।
पश्यन्त्योऽम्बुनि तत्रतत्र शतशः पद्मोत्पलानां वनीः
गायन्त्यो मधुरं स्वेण तरणिं सञ्चोदयन्ति स्म ताः ॥ ४ ॥

चलापाङ्गे किञ्चित्प्रसरति विलीना झषगणाः
स्मितेऽप्याविर्भूते विकसितमभूदुत्पलवनम् ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

उपक्रान्ते गीते सपदि मधुपा दूरमगमन्
पुरा वक्त्रे स्त्रीणां सरयमपतन्ये च विवृते ॥ ५ ॥

दण्डक्षेपवलद्भुजाग्रवलयप्रत्युप्तरत्नप्रभा-
जालालातनिपातशङ्कितरटद्धावज्जलेभच्छटाः ।
एतद्घोरतरार्भटीप्रशमितक्षोदिष्ठयादोगण-
व्यापारां समचोदयन् पयसि तां नौकामभीकाः स्त्रियः ॥ ६ ॥

स्वेदक्लिन्नमृगीमदं श्लथकचप्रभ्रंशिपुष्पोत्करं
व्यालोलालकतारहारमसकृद्विस्रस्तरुद्धांशुकम् ।
हृष्यत्कङ्कणनिक्वणं स्तनतटे प्रभ्रष्टचेलाञ्चलं
नौकायाः परिवर्तनेन तदभूत्सर्वं वधूमण्डलम् ॥ ७ ॥

तत्रामोदहिमोदमिश्रितघुमत्पाटीरपङ्कोत्तमै-
रन्योन्यं परिदिग्धबाहुलतिकाः सद्रत्नभूषोज्ज्वलाः ।
बिभ्राणास्सुममालिकास्सतिलका धूपैर्वरैर्धूपिताः
सामोदं कृतवीटिका युवतयः स्वर्गं वृथा मेनिरे ॥ ८ ॥

तथाऽरमत सर्वात्मा तत्र स्त्रीषु हरिर्यथा ।
मय्येव रमते शौरि रिति मन्येत तज्जनः ॥ ९ ॥
तथाहि—
गृह्णाति क्वचिदञ्चले क्वचिदलं कर्षत्यसौ कुन्तले
फाले न्यस्यति चित्रकं किरति च प्रालेयतोयं स्तने ।

चक्रे चुम्बति कुत्र चित्स्पृशति च क्वाप्यङ्गुलीभिः कटिं
तत्रैवं नृहरिर्वधूसमुदये पूर्णत्वमाशंसति ॥१०॥

लावण्यं क्व चिदीक्षतेऽधरसुधामाकाङ्क्षते च क्वचित्
वक्षोजेषु नखक्षतिं वितनुते ज्ञात्वाऽऽशयं भाषते ।
एकान्तं भजते क्वचित्क्षणमसौ शेतेऽङ्क एव क्वचित्
सर्वासामपि योषितां स रमते सान्निध्य एव प्रभुः ॥११॥

क्रीडन्नाभीरकन्याभिः भानुकन्याम्भसि प्रभुः ।
विनोदमकरोदेवं वाक्केलिधृतकौतुकः ॥१२॥

वेण्यां कर्षति कोऽयमत्र शठ मे हा चुम्बसि त्वं मुखं
शैवालं ननु कर्षितं न किमयि स्वाघ्रातमम्भोरुहम् ।
हा मां वञ्चयसि प्रमत्त न तथा हत्वा स्तनौ ते शपे
प्रज्ञा ते क्व तवोरुमूलमविशद्धा हन्त किं कुर्महे ॥१३॥

हा रे क्रूर कुचं मम स्पृशसि किं बाले न किं कुट्मलं
चक्षुस्ते क्व तवांशुकं क्व नु गतं वेणीसमाबन्धने ।
स्वस्तं किञ्चिदतो नु तद्भ्रममगाद्वाचाट युक्तं न ते
सत्यं ताडय तेन मामिति गिरा कृष्णस्य सा विस्मिता ॥१४॥

पश्यावोऽञ्जवनं तथैव सखि हा किं वाऽपतन्नेत्रयोः
मुग्धे! सारसकेसरः किमधरे दृष्टा सखीन्दिन्दिरैः ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

चेलं कर्षति कोऽस्ति भीरु पवनः किंवाऽपतद्वक्षसी-
त्याश्लिष्टस्य भिया कयाऽपि सुहृदं कृष्णोऽत्र योषाकृतिः ॥१५॥
इति तत्र हरिं स्त्रीषु रममाणं यथामतम् ।
अतोषयन् विरिञ्चाद्याः सौवर्णसुमवृष्टिभिः ॥१६॥
तत्र,—
बध्वा स्तनाच्चलमलं स्मितपूर्णगण्डाः
कृत्वा कचेषु कुसुमानि गृहीतदण्डाः ।
पश्यन्त्य एव नृहरिं तदपत्यलीलां
गायन्त्य एव तरणिं समचोदयंस्ताः ॥१७॥

एवमावर्तयन्तीनां नावमाभीरयोषिताम् ।
आनन्दातिशयेनैवमाविरासन् मिथो गिरः ॥१८॥

अहो नः सौभाग्यं वसति सविधेऽत्रैव नृहरिः
परीरम्भारम्भे भजति भुजयोरन्तरमपि ।
यथाकामं कामं दिशति मधुरां नोऽधरसुधां
गिरां दूरे शौरेर्जयति रतिताद्दग्विधसुखम् ॥१९॥

अहो नस्तारुण्यं स्मरपितुरधीनं विजयते
तथेदं लावण्यं कसनमणिभूषोज्वलमपि ।
यदेतन्नैपुण्यं रतिषु बत नश्लाघ्यमभव-
न्मुरारेः कारुण्यात्तदिह सफलं जातमखिलम् ॥२०॥

एवमाभीरभीरूणामाकर्ण्य मधुरा गिरः ।
स्वराडपि सुखीवैतैरब्रवीत्तदिदं हरिः ॥२१॥

अहो मन्दंमन्दं मलयमरुदावाति शिशिरं
पिकव्रातश्चूतानटति रटति स्वैरमसकृत् ।
इहेदानीं धन्यः स्फुटमनुभवत्येष तदिदं
वधूनां सौन्दर्यं शतमखमुखानामसुलभम् ॥२२॥

एवं प्रशस्य बहुधा नृहरिस्स्वभाग्यं
भाग्यं श्रियोऽपि स वधूहृदयं विवित्सुः ।
दण्डान्विनिक्षिपत भोः करभोपमोर्वः
पश्चादितःपरमिति प्रहसन् जगाद ॥२३॥

आकर्ण्य वचनं तस्य स्मितपूर्वमुदीरितम् ।
मत्वा तत्कुटिलं योषा रोषादिदमथाब्रुवन् ॥२४॥

हा किं जल्पसि साधुसाधु विदितं चेतस्त्वदीयं हरे
बालं सान्त्वयसि क्षतिं विरचयन् गात्रेषु डोलादिभिः ।
का वा त्वामयि विश्वसेदलमलं वाचाऽनया तां दृढं
बध्वा निक्षिप दूरतो न चलति ह्यस्मासु युक्तिस्तव ॥२५॥

दृष्ट्वा तवाधरसुधारुचिरं मुखाब्जं
श्रुत्वा च ते श्रुतिमधूनि वचांसि मोहात् ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

आयात्वनेन क उपाधिरिति स्थिताः स्मः
प्रागेव नैवमिति नो विदितं मतं ते ॥२६॥

एवं वचोभिर्बहुधा क्रूरैस्तास्तमवाकिरन् ।
तीक्ष्णधारैरिवाम्भोभिः सुमेरुं मेघपङ्क्तयः ॥२७॥

तत्र—

त्रिदशविभुसभायां पण्ययोषित्प्रपञ्चः
त्रिपुरहरसभायां प्रेतभूतप्रपञ्चः ।
जलजभवसभायां मौनिभिक्षुप्रपञ्च-
स्त्विति नृहरिसभायामूचुराभीरकन्याः ॥२८॥

किञ्च—

तात्रानुलेपनमणीमयभूषणस्रक्-
ताम्बूलदिव्यवसनैस्समलङ्कृतास्ताः ।
कान्ताःस्वरौप्यतरणौ हरिणा विरेजुः
कामं स्वकीयसरणौ शशिनेव ताराः ॥२९॥

किञ्च—

आश्लिष्यन्त्यः प्रतितृटि मिथो भावयन्त्योऽब्जनाभं
निध्यायन्त्यस्सरसमनघं चेष्टयन्त्योङ्गकानि ।
उद्गायन्त्यो मुहुरपि कलं द्योतयन्त्योऽनुरागं
ताः क्रीडन्त्यस्सुसुखमसुखं विस्मरन्ति स्म मुग्धाः ॥३०

सौन्दर्यातिशयेनाथ भुवि वस्त्वन्तरं स्त्रियः ।
स्वसमानमनालोक्य सगर्वमिदमब्रुवन् ॥३१॥

विधिहरहरयो वा शक्रमुख्यास्सुरा वा
कचकुचवदनानां वीक्ष्य नो रूपलक्ष्मीम् ।
विगलितधृतिसाराः किं भजेयुर्न मोहं
विधुतमहितभावाः किं भवेयुर्न नम्राः ॥ ३२ ॥

ब्रह्माऽपि स्वसुतां समीक्ष्य सहसा मोहाटवीं प्राविशत्
बृन्दां वीक्ष्य पुरा पुराणपुरुषोऽप्यङ्गीचकार भ्रमम् ।
सर्वज्ञोऽपि स दारुकावनवधूमोहान्धकारेऽपत-
त्पाशं शौरिरिहापि नस्समगमद्धाग्यं वधूनामहो ॥ ३३ ॥

आनन्दातिशयेनैव मानन्दनिधिसन्निधौ ।
नार्यो मदवशादूचुः विवशास्तदिदं पुनः ॥ ३४ ॥

जानीते रतिमज्ञसाऽनुभवितुं मिथ्या गिरं प्रब्रुवन्
जानीते स्पुटमेव मोहयितुमप्यालोकिते स्त्रीजने !
जानीते किल पृष्ठतोऽन्वटितुमप्यालोक्य नस्सौभगं
जानीते कथमेव चालयितुमत्रैतां स नौकां शिशुः ॥ ३५ ॥

तत्रैवं रममाणानां तासामानन्दमद्भुतम् ।
नालं स्मर्तुमपि ब्रह्म वक्तुमन्ये कियद्विधाः ॥ ३६ ॥

—* इति द्वितीयः सर्गः संपूर्णः *—

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

अथ तृतीयः सर्गः

श्रुत्वाऽथ वचनं तासां सौन्दर्यमदगर्वितम् ।
चिन्तयामास निभृतं स्वान्त एव तदा हरिः ॥ १ ॥

उन्मस्तकं मदमसौ तरुणीजनानां
देवोऽवतारयितुमत्र विचित्रशक्तिः ।
सेनेऽतिवातघनगर्जितभीकरोरु-
वर्षान्धकारसमुदञ्चितरन्ध्रतोयैः ॥ २ ॥

मेने यथा हृदि वधूनिवहोरुगर्व-
निर्वापणाय निगमान्तविचारवेद्यः ।
तेने तथैव सहसा सुरसन्निकायः
सञ्चोदितो भगवता हृदि संस्थितेन ॥ ३ ॥

ततः—

शान्तक्षेपणिताण्डवं सरभसव्यालीनगानारवं
शङ्कातङ्किमनोङ्गनासमुदयं सच्छिद्रनौकातलम् ।
जज्ञे दुस्सहदुर्निवारतरणिस्वच्छन्दचारं तदा
दुर्वाताम्बुदघोषभीषणमहावर्षं नभोमण्डलात् ॥ ४ ॥

तदा नौकातलच्छिद्रादागच्छति जलेऽङ्गनाः ।
विमदा विह्वला भूत्वा मिथो वचनमब्रुवन् ॥ ५ ॥

गर्जन्त्यभ्रगणाः पतन्ति च शिलाः रुन्धन्ति धारा दिशः
वाताश्चैव तदुद्भवास्तत इतः कर्षन्ति नौकामिमाम् ।
कृत्वा रन्ध्रमिहापि हन्त तरणेरन्तः प्रविष्टं पयः
किं कुर्मः किमनाथ्यसौ नृपसुतः का वा भवेन्नो गतिः ॥ ६ ॥

प्रागेवेदमनर्थहेतुरिति सुव्यक्तं मयोक्तं स्त्रियः
श्रोत्रे किं न्यपतत्तदीषदपि वः सत्यं बलीयान् विधिः ।
बह्वीनां स्थितिमेकतो मृगदृशामाहुर्युगान्ते बुधाः
गर्वेणैवमभूदितः परमियं भानोस्सुता नो गतिः ॥ ७ ॥

एतन्महार्हगुणदूषणदोषतो वा
कस्याश्चिदत्र युवतेः द्रुतशापतो वा ।
अस्माकमेव गृहनिर्गमलग्नतो वा
सम्भावितं तदिदमस्य शमं न विद्मः ॥ ८ ॥

कृत्यं रहस्यमिह नः प्रथितं यदि स्यात्
तद्वल्लभैरपि वियोजयितुं न किं स्यात् ।
आनीत एष न विमृश्य वधूभिरत्र
हा नोऽद्य चञ्चलमधैर्यमुपैति चेतः ॥ ९ ॥

इति चिन्तां समासाद्य त्रातारमनवेक्ष्य च ।
कालिन्दीं प्रार्थयामासुः एवं क्षेमाय ताः स्त्रियः ॥ १० ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

कालिन्दि तेऽञ्जलिरयं रचितोऽङ्गनाभिः
सम्पूज्य पुष्पनिकरैः बहुधाऽतिभक्त्या ।
कामेन वामगतिना खलु वञ्चिताः स्मः
त्रायस्व नस्तव गृहाण विभूषणानि ॥ ११ ॥

अस्माभिरेकमिह चिन्तितमन्यदेव
दैवेन किं किमिहनिश्चित मस्ति वा नः ।
फाले यथैव लिखितं विधिना तथाऽस्तु
बालं तटं गमय भो यमुने नमस्ते ॥ १२ ॥

स्त्रीभिः कृतं किमपि तत्प्रलयाय नूनं
ह्यासीद्विनोद इह नोऽयमनर्थहेतुः ।
बुद्ध्या हताः स्म इह तत्कथनं किमर्थं
त्रायस्व बालकमिमं स हि जीवितं नः ॥ १३ ॥

एवं तां प्रार्थयन्तीस्ता हर्यर्थे हरिणीदृशः ।
दृष्ट्वा विधिमुखा देवा एवमन्योन्यमब्रुवन् ॥ १४ ॥

अपारसंसारसमुद्रतः श्रितान्
सन्तारयत्येष निमेषतः प्रभुः ।
स्त्रियो नदीं तस्य कृतेऽल्पजीवनेऽ
प्यहो मुहुस्तां प्रणमन्ति सादरम् ॥ १५ ॥

अथ तत्प्रार्थनायां च व्यर्थायां व्रजयोषितः ।
शौरेः पूर्वस्थितिं स्मृत्वा विलप्तुमुपचक्रमुः ॥ १६ ॥

क्रीडन्तं पुरि शैशवेन तरुणीतुङ्गस्तने निर्मलं
गृह्णन्तं प्रतिगेहमन्ययुवतीस्सायंदिवं सद्धियम् ।
मुख्यन्तं सुदतीजनैस्सह तरुच्छायासु धीरैर्नुतं
बालं तं समनीनयन्निह सरिन्मध्यं स्त्रियो हा कथम् ॥ १७ ॥

दुर्बुद्धचैव हि सङ्गतोऽयमतलोऽनर्थोऽत्र नो योषिता-
मानीतोऽयमिहाप्सु दुर्युवतिभिस्तोयेऽतिभीरुर्हरिः ।
कालिन्दीं सहसा प्रतार्य निबिडे बर्षान्धकारेऽप्यसुं
सीदन्तं पृथुकं पुनर्गमयितुं मात्रन्तिकं हा कथम् ॥ १८ ॥

अथैवं विलपन्तीनां तासामाभीरयोषिताम् ।
सुभीतवदिमां वाचं प्रोवाच मधुसूदनः ॥ १९ ॥

अयि बदरकृतेसं गृह्य मुक्ताफलानि
प्रविशति मयि वीर्धी नर्मगोष्ठ्या स्त्रियां वः ।
पयसि मिहिरसूनोर्वञ्चितोऽहं विनीतो
हितामिति युवतीनां विश्वसेत्को नु वाचः ॥ २० ॥

वैद्यस्येव वचश्शौरेरधैर्यकरमङ्गनाः ।
श्रुत्वा तत्सुभृशं भीताः कान्तास्तदिदमब्रुवन् ॥ २१ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

स्थितमयि पुरि पौरान् वञ्चयित्वा भवन्तं
द्रुतमनुनयवाक्यैरानयन्तीभिराभिः ।
इह मधु मधुकीद्यान् वञ्चयित्वा विसृष्टं
स्फुटमुरुतरुशाखाबद्धमानीय भूमौ ॥ २२ ॥

हा त्वन्निमित्तमयि नस्तनुपोषणं च
हा त्वत्कृते गुरुजनस्य विमाननं च ।
स्नानादिकर्मसु सदा स्मरणं च ते नः
किं न्वेतदर्थमहहाद्य हरे सुजातम् ॥ २३ ॥

आतृप्ति तेऽङ्घ्रिकमलद्वयसेवनेच्छाः
देहां स्वदर्थमुपकल्पयितुं स्थिताः स्मः ।
सौख्यं त्वितःपरमिति त्वयि नो दुराशा
किं न्वेतदर्थमहहाद्य हरे सुजातम् ॥ २४ ॥

त्वं वेदवेद्य इति नोऽसदृशी प्रपत्तिः
त्वन्नाम तारकमिति त्वदुपासनं च ।
त्वद्बाल्यकृत्यसहनं च कथं चिदेव
किं न्वेतदर्थमहहाद्य हरे सुजातम् ॥ २५ ॥

प्राग्जन्मकोटिषु भृतं सुमहत्तपश्च
प्राप्तः पुराजनृपि राघवतो वरश्च ।

एतन्निमित्तमयि किं त्वयि तद्वयं नः
त्यक्तुं वयः पयसि हा नृहरे सुजातम् ॥ २६ ॥

विलपन्तीर्भृशमिमा आभीरयुवतीरसौ ।
समीक्ष्य जीवनोपायमिदमाह तदा हरिः ॥ २७ ॥

कालो न शोचितुमयं भजताऽऽशु धैर्यं
कामस्य हन्तुरपि कर्मफलं ह्यलङ्घ्यम् ।
उन्मुच्य कञ्चुकचयान् द्रुतमेव नौका-
रन्ध्रे विनिक्षिपत साधु यथाऽम्बु नेयात् ॥ २८ ॥

श्रुत्वा तदा यदुवरस्य वचोमृतानि
मत्वा हितानि सहसा व्रजसारसाक्ष्यः ।
बध्वाऽञ्चलानि सुदृढं नवकञ्चुकानि
मुक्त्वा मुखे निदधिरे विवरस्य तस्याः ॥ २९ ॥

—* इति तृतीयः सर्गः समाप्तः *—

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

I-1534

अथ चतुर्थः सर्गः

तद्रत्नचित्रितसुकञ्चुलिकाकदम्बं
क्षिप्तं मुखेऽतिविपुलस्य बिलस्य तस्य ॥
नीतं बहिस्सपदि तुङ्गतरङ्गसङ्घै-
स्तास्तत्समीक्ष्य सहसैव तदैवमूचुः ॥ १ ॥

हा तानि कञ्चुकशतानि हतानि नीरे
वाताहतिं न सहते तनुता तनोर्नः ।
जानूपरि स्पृशति रन्ध्रविनिर्गताम्भः
का नो गतिर्वद हरे पृथु ते यशस्स्यात् ॥ २ ॥

अस्मानुपायकथनेन वियोगभीरू-
स्त्रायस्व दर्शय बलं तव यत्पुरोक्तम् ।
संयोगतोऽजनि वधूभिरयं प्रयासः
साहाय्यमाचर कदाऽपि न विस्मरेम ॥ ३ ॥

जज्ञे किमेतदसुहृज्जनदृष्टिदोषा-
ज्जन्मैव नः किमथवाऽन्यकृते स्वदोषात् ।
न त्रायसे श्रितनृपाल भयात्किमस्मान्
नायाति हा तव कृपा नृहरे किमर्थम् ॥ ४ ॥

इति तासां महाबाहु र्निशम्य परिदेवनम् ।
इदमाह तदा शौरिः कटूपधसमं वचः ॥ ५ ॥

नायं भवत्यवसरः परिदेवनस्य
साध्यं भवेज्झडिति पश्यत कार्यशेषम् ।
स्वीयं नवांशुकचयं सहसा विमुच्य
देयं मुखाय विवरस्य वधूभिरस्य ॥ ६ ॥

श्रुत्वा हरेरिदमधीरदृशोऽन्तरङ्गे
गत्वा नवं परिभवं व्यथया ह्रिया च ।
मूत्वा परं विमनसस्स्वनितम्बिनीत्व-
मुक्त्वा धिगस्त्विति पुनर्गिरमेवमूचुः ॥ ७ ॥

कार्यं कथं तदिदमाः किमुवाच शौरे-
रस्मासु मानधनता नहि किं स्त्रियश्चेत् ।
हा किं रहस्यमिह जीवितमस्ति चेन्नः
कान्ताः पुरे निजधनं परिपालयामः ॥ ८ ॥

हा कृष्ण किं वदसि वञ्चनया तवालं
कस्याश्चिदप्यनघ मा पुरतो वदैवम् ।
माभूदिहापदि तदेतदसाधु मौर्ख्यं
गोप्यो विमृश्य कुरुताश्रियमात्महत्या ॥ ९ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

हा कृष्ण शक्नुयुरिमाः किमिहापि नश्नैः
स्थातुं नवैरवयवैर्भुवि तद्यशो वा ।
हा हन्त मद्वचनमद्य निशम्य मुग्धाः
मां प्रापयिष्यथ तटं किमितो न जाने ॥ १० ॥

किंपाप्मनां फलमिदं नृहरे वधूनां
किं नो ललाटलिपिरेवमिह स्थिता वा ।
वादाय किं प्रणय एष निसर्गतश्चेत्
वामाः कदापि भुवि विश्वसितुं न योग्याः ॥ ११ ॥

एवं निशम्य वचनं हरेरक्लिष्टकर्मणः ।
चिन्तयामासुरबलाः मिथः कर्तव्यतां प्रति ॥ १२ ॥

समस्तजगदाधारः सर्ववेदार्थनिश्चयः ।
केन वा ज्ञायते देवः पथा सर्वस्समीक्ष्यताम् ॥ १३ ॥

निश्चित्य सत्यमिति तस्य वचः स्त्रियस्ताः
कृष्णस्य तत्र शनकैः स्वदुकूलजातम् ।
उन्मुच्य सत्रपमथो विवरान्तरेऽस्मिन्
निक्षिप्य तस्थुरथ तत्सरिदाजहार ॥ १४ ॥

पश्येयुरित्यथ भृशं प्रतिपद्य लज्जां
सङ्कुच्य गात्रमखिलं विनताननाब्जाः ।

आच्छादनाय कुचयोः करयोर्युगं स्वं
नाभूदिति स्वहृदि दैवमदूषयंस्ताः ॥ १५ ॥

तासां गलद्वसनशैवलबन्धखिन्न-
द्वक्षोजकुट्मलतनूलतिकाननाब्जैः ।
नौकासरोऽम्बुभरितं स्पुटमन्तिकस्थ-
तत्कृष्णजीवनदतां प्रकटीचकार ॥ १६ ॥

नीतेषु तेषु वसनेषु विवर्धितेषु
नीरेषु रन्ध्रमुखतः सहसाऽऽपतत्सु ।
निक्षिप्य वक्षसि हरिं प्रसमीक्ष्य तस्य
रूपं मगद्वदमिदं पुनरब्रुवंस्ताः ॥ १७ ॥

एवं ललाटलिखितं यदि नो विधात्रा
तस्यान्यथाऽद्य न भवेदिति ते वचोभिः ।
नग्ना अभूम तदिहाद्य हरेऽवशिष्टं
हा कष्टमंशुकचयः क्व न दृश्यते हि ॥ १८ ॥

एवं विलप्य करुणं हृदि पूर्वपुण्यात्
मत्वाऽथ नश्वरमितीदृशसर्वभाग्यम् ।
तत्कृष्णपादसरसीरुहमाप्तुकामा
वामा अपि स्फुटतरं मिथ एवमूचुः ॥ १९ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

पश्यामो न कमप्युपायमिह यत्नातुं स्त्रियो नो भवे-
दाकण्ठं समभूज्जलं न सहते भारं त्वितो नौर्ध्रुवम् ।
नामैवास्य हरेरजस्य वदताध्यायन्त्य एवासकृत्
भक्त्या तच्चरणौ स हि श्रितविभुर्दद्यात्सुखं नो हरिः ॥ २० ॥

नीतं कञ्चुकमंशुकं च विगतो मानः क नो जीवितं
नौका मज्जति मज्जतीह हरिरप्यद्याम्बु संवर्धितम् ।
भो ब्रह्मेश मुकुन्द माधव हरे नस्सद्गतिं प्रापये-
त्याक्रोशद्भरवल्लवीकलकलैर्दृष्टस्तदाऽभूद्धरिः ॥ २१ ॥

सर्वाधारः सकलगुणधि र्निर्गुणो निर्विकारः
सर्वात्माऽसौ सकलविभवोऽप्यादिमध्यान्तशून्यः ।
साक्षी देवस्सकलनिगमोत्तंसको मोहनाङ्गः
साक्षादासीत्तमथ महिलाः प्रार्थयामासुरेवम् ॥ २२ ॥

इदं सर्वं नित्यं न भवति जगद्भोगविषयः
पदं ते दिव्यं नः प्रदिश परमं श्रीश नृहरे ।
यदेतद्ब्रह्मेन्द्रप्रमुखविबुधैस्सेवितमलं
शुकेभेन्द्राकूरप्रभृतिविनुतं वेदविदितम् ॥ २३ ॥

आकर्ण्य नी नृहशां भृशमर्थतां ता-
मालो त्य तादृशदशामतिदुस्सहां च ।

कन्यादनीरदमरुत्कृतदीनरक्षः
कृष्णस्तदा हितमिदं कृपयाऽऽचचक्षे ॥ २४ ॥

मामेव चेतसि निधाय पिधाय नेत्रे
पाणिद्वयेन सहसैव निरुद्धबाष्पाः ।
भक्त्या क्षणं भजत चेद्धवदिष्टदैवं
दद्यात्सुखं युवतयः कुरुतैवमाशु ॥ २५ ॥

वैद्यस्येव गदार्दिता धनवतो निस्स्वा यथा सेवका
गर्भिण्यश्च यथा प्रसूतिसमये स्वे सूतिकायास्तथा ।
भक्त्या तत्र वचो निशम्य नृहरेराच्छाद्य हस्तैः स्त्रियः
स्वान्यक्षीणि भजन्त्य एव हृदि तं प्रापुः स्थितिं पूर्विकाम् ॥२६

न ध्वान्तं नहि गर्जितं न च मरुद्वर्षं न चाम्भोधराः
नौकायां नहि कुत्रचिज्जललवो नालोकि रन्ध्रं क्व वा ।
दृष्ट्वा साऽपि निजस्थली तरलतामुत्सृज्य तत्र स्त्रिय-
श्चेलान्यन्तिक एव कञ्चुकयुतान्यालोक्य हर्षं गताः ॥ २७ ॥

स्वक्षिभ्रु स्मितमञ्जु खेलदलकं फालस्फुरच्चित्रकं
चञ्चत्कुण्डलरत्नदीधितिलसद्गण्डस्थलीशोभितम् ।
दृष्ट्वा मन्मथमन्मथस्य नृहरेरास्यं तदिन्दूज्ज्वलं
मुग्धास्तत्र पुराऽनुभूतमसुखं विस्मृत्य हृष्टा बभुः ॥ २८ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

दृष्ट्वा तं निजरूपनिर्जितमनोजन्मानमब्जाननं
मानार्थं मृदुभाषिणं मुरहरं स्निग्धावलोकं हरिम् ।
क्रीडन्तं सततं निकुञ्जसदने हृत्कञ्जमध्ये सतां
त्रातारं वरकुञ्जरस्य नितरामालिङ्ग्य हृष्टाः स्त्रियः ॥ २९ ॥

गन्धान् हिमोदकलितान् घनसारमिश्रान्
भूवल्लभाय हृदुरस्वजचारुनेत्र्यः ।
कस्तूरिकातिलकमभ्यलिकेऽस्य चक्रुः
शीतांशुवंशतिलकस्य तदा तरुण्यः ॥ ३० ॥

दिव्यैस्सुवर्णवसनैर्मणिभूषणैश्च
पुष्पादिभिर्मदनरूपमपूजयंस्ताः ।
सर्वं निवेद्य निजभोगसुखं तवेति
नीराजनं च निगमादसथस्य चक्रुः ॥ ३१ ॥

तस्योपदां समुपकल्प्य मुदा तरुण्यः
तारुण्यमेव तरुणस्य तदा स्वकीयम् ।
चक्रुः प्रणाममपि मानस एव मुग्धाः
भक्त्याऽन्विता मुरहरस्य सहस्रकृत्वः ॥ ३२ ॥

एवं हरिं हरिणलोलविलोचनास्ताः
सम्पूज्य तत्र सुभृशं विविधोपचारैः ।

आनन्दमापुरतुलं हृदि योगभाजः
सन्दर्शनाद्भगवतोऽनुभवन्ति यं वै ॥ ३३ ॥

तारागणामिव चन्द्रमा दिविषदां मध्ये यथैषां विभुः
मुक्तानामिव पद्मरागतरलो यद्वद्वशानां द्विपः ।
शौरिस्तद्वदभात्तदा मृगदृशां मध्ये सुराः प्रेक्ष्य तं
सम्पूज्यापि सुमैस्ततो निरगमंस्तद्वीक्ष्य हृष्टाः स्त्रियः ॥ ३४ ॥

तत्तोऽवरुह्य तरणेस्तरुणीगणास्ते
जग्मुस्सहैव हरिणाऽथ पुरं स्वकीयम् ।
सानन्दमध्वनि निजोत्सवसम्भ्रमेण
सार्थीकृतेन्द्रमुखवर्त्यनिमेषभावाः ॥ ३५ ॥

गन्धेन मूर्च्छति दिशो दश दिव्यधूपैः
पुष्पाणि वर्षति नभस्स्थितदेवसङ्घे ।
कान्त्या प्रसर्पति दिशः करदीपिकौघैः
गच्छन्परां पथि मुदं स वधूजनोऽगात् ॥ ३६ ॥

दृप्यन्नवांशुकचयैर्वरकञ्चुकैश्च
पादाङ्गुलिक्वणिततन्नवभूषणैश्च ।
हस्ताङ्गुलिस्फुरितरत्नमयोर्मिकाभिः
गच्छन् परां पथि मुदं स वधूजनोऽगात् ॥ ३७ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

गण्डस्थलीस्फुरितकर्णविभूषणैश्च
वक्षस्स्थलीचलितभासुरतारहारैः ।
हस्ताङ्घ्रिनिक्वणितकङ्कणनूपुराद्यैः
गच्छन् परां पथि मुदं स वधूजनोऽगात् ॥ ३८ ॥

गायन् हरिं दिवि किरन् पटवासपांसून्
प्रोक्षन्मिथः स्तनतटेषु हिमोदबिन्दून् ।
विष्वग्दिशो धवलयन् स्मितचन्द्रिकाभिः
गच्छन् परां पथि मुदं स वधूजनोऽगात् ॥ ३९ ॥

संवीजयन्करचलद्व्यजनानिलैः स्वै-
रालिङ्गयन्मुहुरुरोजयुगैर्भुजैश्च ।
तत्रोद्वहन् सरसमच्युतमक्षियुग्मैः
गच्छन् परां पथि मुदं स वधूजनोऽगात् ॥ ४० ॥

बम्मिल्लविच्छुरितदिव्यसुमोत्थिताभि-
रुत्कीर्यमाणपटवाससमेधिताभिः ।
स्वैरं भ्रमद्भ्रमदनर्घसुवासनाभिः
गच्छन् परां पथि मुदं स वधूजनोऽगात् ॥ ४१ ॥

एवं व्रजन् व्रजवधूनिवहस्तदानीं
हर्षेण तं सह नयन् मधुकैटभारिम् ।

मन्त्रेपुरं किमपि नैजविहारगेहं
संप्राप्य तत्र तदिदं शुभमाचचक्षे ॥ ४२ ॥
मङ्गलं महानुभाव देवदेव मङ्गलं
मङ्गलं श्रितास्मदार्तिभञ्जनाज मङ्गलम् ।
मङ्गलं परात्परेन्दिरासहाय मङ्गलं
मङ्गलं मुकुन्द कृष्ण ते सदाऽस्तु मङ्गलम् ॥ ४३ ॥

— इति चतुर्थस्सर्गः. —

एतद्वेङ्कटसूरिणा विरचितं पापौघविध्वंसनं
पुण्यं पुण्यकृतां हितं सुमहितं नौकाचरित्रं हरेः ।
नित्यं यश्शृणुयापठेच्च स भवेद्भक्त्या विशिष्टो बला-
देनैवाशु सुयोजितोऽत्र परतः श्रेयोऽमृताम्बां सुधीः ॥ ४४ ॥

इतिश्री वेङ्कटरायसूरिरचितं नौकाचरितं समाप्तम्.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

R70

I-1534

ಪೆಟ್ಟಿಗೆ ಸಂಖ್ಯೆ.....

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY

Class R 70 Ac. No. 2151

Author

Title

Lent	Returned	Lent	Returned	Lent	Returned
23/12/41	27/1/41				

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY

This book was loaned on the last date mentioned below and it is returnable within a fortnight therefrom unless the loan is renewed.

1641-36 B.P.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

R70